# Sarpa Suktam 3

# सर्पसूक्तम् ३

## Document Information

Text title : sarpasUktam 3

File name : sarpasUktam3.itx

Category : deities_misc, sUkta, svara

Location : doc_deities_misc

Description/comments : Taittiriya Samhita 4.2.8 portions of 3.1.1 5 and 6, and Taittiriya Aranyaka 0.1.12 58

Latest update : June 20, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 20, 2021

*sanskritdocuments.org*

# Sarpa Suktam 3

# सर्पसूक्तम् ३

नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥
येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः ॥
या इषवो यातुधानानां ये वा वनस्पतीꣳरनु ।
ये वा वटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥ ४। २। ८॥ (TS) १

इदꣳ सर्पेभ्यो हविरस्तु जुष्टम् ।
आश्रेषा येषामनुयन्ति चेतः ॥ (३। १। १। ५॥ TS)
ये अन्तरिक्षं पृथिवीं क्षियन्ति ।
ते नः सर्पासो हवमागमिष्ठाः ।
ये रोचने सूर्यस्यापि सर्पाः ।
ये दिवं देवीमनु संचरन्ति ।
येषामाश्रेषा अनुयन्ति कामम् ।
तेभ्यः सर्पेभ्यो मधुमज्जुहोमि । (३। १। १। ६॥) (TS) २

निघृष्वैरसमायुतैः । कालैर्हरित्वमापन्नैः । इन्द्रायाहि सहस्रयुक् ।
अग्निर्विभ्राष्टिवसनः । वायुः श्वेतसिकद्रुकः । संवथ्सरो विषूवर्णैः
। नित्यास्तेऽनुचरास्तव । सुब्रह्मण्योꣳ सुब्रह्मण्योꣳ सुब्रह्मण्योम् । (०।१।१२। ५८) (TA) ३

स्वररहितम् ।

नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु ।
ये अन्तरिक्षे ये दिवि तेभ्यः सर्पेभ्यो नमः ॥

येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु ।
येषामप्सु सदः कृतं तेभ्यः सर्पेभ्यो नमः ॥

या इषवो यातुधानानां ये वा वनस्पतीँ॒रनु ।
ये वा वटेषु शेरते तेभ्यः सर्पेभ्यो नमः ॥ ४। २। ८॥ (TS) १

इदँ॒ सर्पेभ्यो हविरस्तु जुष्टम् ।
आश्रेषा येषामनुयन्ति चेतः ॥ (३। १। १। ५॥)
ये अन्तरिक्षं पृथिवीं क्षियन्ति ।
ते नः सर्पासो हवमागमिष्ठाः ।
ये रोचने सूर्यस्यापि सर्पाः ।
ये दिवं देवीमनु संचरन्ति ।
येषामाश्रेषा अनुयन्ति कामम् ।
तेभ्यः सर्पेभ्यो मधुमज्जुहोमि । (३। १। १। ६॥) (TS) २

निघृष्वैरसमायुतैः । कालैर्हरित्वमापन्नैः । इन्द्रायाहि सहस्रयुक् । अग्निर्विभ्राष्टिवसनः । वायुः श्वेतसिकद्रुकः । संवथ्सरो विषूवर्णैः । नित्यास्तेऽनुचरास्तव । सुब्रह्मण्योँ॒ सुब्रह्मण्योँ॒ सुब्रह्मण्योम् । (०।१।१२। ५८) (TA) ३

These are from Taittiriya Samhita (TS) 4.2.8, portion of 3.1.1 5 and 6,
and Taittiriya Aranyaka (TA) 0.1.12 58.

*Sarpa Suktam 3*

pdf was typeset on June 20, 2021

Please send corrections to *sanskrit@cheerful.com*